CC0. In Public Domain, Digitizagtion by eGangotri

५।।

कृष्णगीतम्

KRISHNAGITAM

[रागकाव्यम्]

[RĀGAKĀVYAM]

रचयिता

Written by

कविचक्रचूडामणिः सोमनाथमिश्रः

KAVICHAKRACHŪDĀMANI SOMANĀTHA MISHRA

संपादकः

Editor

प्रभातशास्त्री

PRABHĀTA SHĀSTRĪ

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मूल्यम्—सप्तमुद्राः

Price Rs. Seven Only

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आदरणीया
श्री कपिलावात्स्यायन को
सादर भेंट
प्रभात
१८।११।८२

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कृष्णगीतम्

KRISHNAGITAM

[रागकाव्यम्]

[RĀGAKĀVYAM]

रचयिता

Written by

कविचक्रचूडामणिः सोमनाथमिश्रः

KAVICHAKRACHŪDĀMANI SOMANĀTHA MISHRA

संपादकः

Editor

प्रभातशास्त्री

PRABHĀTA SHĀSTRĪ

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रकाशक:
देवभाषाप्रकाशनम्
दारागंज-प्रयाग: ६

Published By
Devabhasha Prakashanam
Daraganj, Allahabad-6

प्रकाशनवर्ष:
सन्—१९८१
प्रथ मसंस्करणम्

Publication year
1981 A. D.
First Edition

मुद्रक :
देववाणीमुद्रणालय:
नया बैरहना, इलाहाबाद-३

Printed at
Devavani Mudranalaya
New Bairahana, Allahabad-3

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पुरोवाक्

लघुकायस्य प्रस्तुतरागकाव्यस्य रचयितुः कविचक्रचूडामणिरित्युपाधिविभूषितस्य श्रीसोमनाथमिश्रमहाभागस्य जन्म भारतवर्षस्य कस्मिन् प्रदेशे कस्मिन् जनपदे कस्मिन् ग्रामे कस्मिन् कुले बभूवेत्यस्मिन् विषये किमपि प्रत्यक्षं प्रमाणं मम समक्षं नास्ति केवलमनुमानप्रमाणेन प्रदेशस्य कुलस्य च निश्चयं विदध्मो वयम्। अस्मिन् प्रसङ्गे अस्य काव्यस्यैकः श्लोक उद्धियते मया—

श्रीराधिकानवलकेलिवशीकृतस्य,
कृष्णस्य गीतमिदमद्भुतभावपूर्णम्।
कृष्णाङ्घ्रिपद्ममकरन्दलिहां नराणा-
मानन्दनाय कुरुते द्विजसोमनाथः॥

श्लोकेऽस्मिन् द्विजपदस्य काव्यान्ते पुष्पिकायां 'श्रीसोमनाथमिश्रविरचितं कृष्णगीतं समाप्तम्' इति मिश्रशब्दस्य च प्रयोगादस्य जनिर्ब्राह्मणकुले उत्तरभारते च बभूवेति सर्वथा विवादविरहितः। कारणं सुस्पष्टम्। मिश्रोपाधिविभूषिता द्विजा उत्तरभारते एव भवन्ति। कविवरस्यास्य जनिकालनिश्चयार्थमपि अनुमानमेवाश्रयणीयम्। रागकाव्येऽस्मिन् कविना वारं वारं प्रत्नैः पण्डितरत्नैरप्रयुक्तोऽपाणिनीयश्च 'नवल' शब्दः प्रयुक्तः। तद् यथा—

'श्रीराधिकानवलकेलिवशीकृतस्य'
'नवलरसवशीकृतेन पत्या'
समुदितमारमनोरथेन रत्या'
'राजति राधा नवलवशे'

पाणिनिव्याकरणेनासिद्धस्यास्य 'नवल' शब्दस्य प्रयोगः हिन्दीभाषायाः महाकवेः सूरदासस्य संगीतात्मके सूरसागररागकाव्ये वरीदृश्यते। यथा—

'नवल सुन्दरी आई बोलति तुमहिं सबै ब्रज बाल'
'नागर नवल कुँवर वर सुन्दर मारग जात लेत जोइ'

ब्रजभाषासूरकोशः पञ्चमखण्डः। पृष्ठम् ६७१

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एतेनाऽनुमोमहें वयं यत् सूरसागरः सोमनाथमिश्रेण सम्यगधीतः। तत एव प्रेरणां प्राप्य प्रस्तुते कृष्णगीते 'नवल' शब्दस्य प्रयोगो विहितः। सूरदासस्य जन्मकालः हिन्दीसाहित्यस्य प्रकाण्डपण्डितेन आचार्यरामचन्द्रशुक्लमहोदयेन 'हिन्दीसाहित्य का इतिहास' नामके स्वीये ग्रन्थे वैक्रमाब्दस्य १५४० तमवर्षस्य सन्निकटे स्वीकृतः। अतः सोमनाथमिश्रस्याऽपि जन्मसमयः सूरदासस्य जन्मकालादनन्तरं वैक्रमाब्दस्य १६२५ तमवर्षस्य पार्श्वे आसीदित्यनुमीयते। तथैव अघस्तने श्लोके—

'जयदेवकृताविवात्र मे न गुणा यद्यपि नैव चातुरी।
तदपि व्रजनाथकीर्तने विदुषो न प्रतिभाति मूकता॥'

कविना कृष्णस्य कृते 'व्रजनाथ' इति शब्दः प्रयुक्तः। तेन प्रतीयते यदस्य जन्मभूमिजनपदः व्रजप्रदेशस्य मथुरानगरी अथवा तत्समीपवर्ती कोऽपि जनपदोऽस्ति। उपर्युक्तश्लोके कविसोमनाथः जयदेवं स्मरत्यतो निश्चितमस्ति यदनेन कविना जयदेवस्य 'गीतगोविन्दम्' सम्यगधीतमनुशीलितञ्च। ततः प्रेरणामवाप्यैवायं कविवरः 'कृष्णगीतम्' नाम प्रस्तुतकृतिं निर्ममे चेत्यपि पुष्यते।

इदं कृष्णगीतं जयदेवस्य गीतगोविन्दमिव सर्गेषु विभक्तनास्ति। कविना केवलं कथासंयोजनाय गीतस्य मध्ये मध्ये श्लोकस्य संरचना संविहिता। महाकविसूरदासस्य सूरसागरेऽपि इयमेव सरणिरस्ति। न तत्र सर्गशब्दस्य प्रयोगः। अतो मन्मते कृतिरियं सूरदासस्य सूरसागरलेखनपद्धतेरनुकृतिमूला, न तु गीतगोविन्दस्य लेखनरीतेरनुकरणात्मिका।

भक्तिभावाञ्चितं भवतापपापभिदं काव्यमिदं कविना स्वस्य मनोविनोदायकृतन्नतु राज्ञां सकाशाद् धनलाभाय विरचितम्। पठन्तु पाठकाः कविशब्देषूद्घोषितां घोषणामिमाम्—

न स्पर्द्धा जयदेवपण्डितकृतौ नो रञ्जनीया बुधाः,
राजभ्यो धनलाभलोभकलया न व्याकुला मन्मतिः।
भक्ताः किं नु हरेर्गुणानुकथने रक्ता भवन्त्येव नो,
तन्मे स्वस्य मनोविनोदनकृते कृष्णस्य गीतङ्कृतम्॥

अनेन पद्येन कवेः हरेर्गुणानुवादकथनन्तु व्याजमात्रम्। वस्तुतः भव्ये काव्ये

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ऽस्मिन् सहृदयसुधीजनमनोमोदकरस्य शृङ्गाररसस्य प्राधान्यं प्रतिपदं व्यनक्तीति मन्यामहे ।

कविरेकस्मिन् स्थले कृष्णवियोगे विकलायाः विलपनशीलायाः राधिकायाः व्याकरणशास्त्रपरिज्ञापनपरिचायकेन एकेन हृद्येन पद्येन चित्रणमित्थं विदधाति—

शीतांशुस्तपनत्यरण्यति गृहं हालाहलत्यम्बुजम्,
हारः सर्पति चन्दनं दहनति स्फीता कथा वज्रति ।
रात्रिः कल्पति चक्षुरभ्रति पिकक्वाणोऽपि वाणत्ययं ;
कामः कालति कृष्ण ! किं न कुरुषे कामं कुरङ्गीदृशः ॥

श्लोकेऽस्मिन् कविकृतक्रियापदप्रयोगच्छटा पाठकानां हृदि पठनकाले कामपि विच्छित्तिन्तु जनयत्येव तेन सह माधवविरहवेदनादग्धायाः राधायाः मनोदशास्वरूपस्यापि चित्रं प्रतिष्ठापयति ।

कथासंयोजनाय संरचिता एतादृशा मर्मस्पर्शिनः श्लोकाः काव्येऽस्मिन् प्रचुरपरिमाणा राराजन्ते । विस्तरभिया नात्र ते समे उद्विध्रयन्ते ।

सरसानां रससिक्तानां स्फीतगीतानामपि रसास्वादं गीतकाव्यमिदमधीयानाः सहृदयाः सुधीजना मनागनुभवन्तुतराम् । शान्ते शीतकाले आगते कान्ते वसन्ते वृन्दावनस्य सकले निकुञ्जतले कामकेलिव्यापृते व्रजविहारिणि समस्ता निशा समतीता । अनन्तरञ्च सञ्जाते प्रभाते समुदिते मयूखमालिनि राधिकायाः कीदृशी कमनीया कान्तिरिति कविकृतमनोऽभिरामवर्णनात्मकेनैकेन गीतेन निभालयन्तु पाठकाः —

अद्भुतशोभा रजनिविरामे ।
सखि ! संप्रति राधिकाशरीरे निजपतिपूरितकामे ॥ ध्रुवपदम्
गलिताधरशोणिमशिथिलालकशोभितवदनसरोजे ।
मुकुलितलोचनचुम्बनलम्बितकज्जलमुदितमनोजे ॥
मृगमदलिखितविचित्रचित्ररुचिकुचतटनखप्रहारे ।
भुजपरिरम्भविमर्दविखण्डितमुक्तामणिमयहारे ॥
श्रमजलविपुलपुलकपृथुवेपथुविस्मृतविरलाभरणे ।
कटिविघटितमृदुवररशनागुणपरिहृतजघनावरणे ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अतिरुचिरुचिकरलम्भितनीवीदर्शनघर्षितरमणे ।
मन्थरचरणविहारविनिर्जितमदवारणवरगमणे ॥
दुस्तरतरमन्मथसङ्गरजितवरवृन्दावननाथे ।
नवनिकुञ्जमधुकरगुञ्जारवनिगदितगुणगणगाथे ॥
चलकुण्डलमर्दितगण्डस्थलचित्रितमकरीमुद्रे ।
विविधनिखिलसौरतरसपोतकतोषितसुरतसमुद्रे ॥
सोमनाथसेवकवर्णितमिति रतवल्लवीविनोदम् ।
शृणुत सकलकलिकालिमहारि भक्तमनःकृतमोदम् ॥

साहित्यशास्त्रस्य आचार्य्यवर्य्यैःकाव्येषु यस्य यस्य विषयस्य वर्णनं सर्वथा वर्जितं कविना तस्य सिद्धान्तस्य अस्मिन् गीतेऽस्य काव्यस्यान्यस्थलेऽपि च अवहेलना विहितेति नात्र विषये किमपि कथयाम्यहम् ।

गीतेऽस्मिन् कविप्रयुक्तस्य 'गमण' शब्दस्य विषये विचारयामो वयम् । वस्तुतोऽयं प्रयोगस्संस्कृतभाषायाः शब्दशास्त्रदृष्ट्या न समीचीनः 'गमन' इत्युचितः । प्रयोगकारणं चिन्तयामः । रागकाव्ये अन्त्यानुप्रासस्य पालनन्न नितान्तमावश्यकमेवापि तु अनिवार्यम् । तं विना गीते माधुर्यं सौन्दर्यञ्च न समायाति । कविना गीतस्य प्रथमपादे रमणे इति प्रयुक्तः, अतोऽन्त्यानुप्रासस्य निर्वाहाय 'गमणे' इत्यस्य प्रयोगस्संविहितः । वस्तुतः 'गमण' इति शब्दः प्राकृतव्याकरणानुसारेण संशुद्धः । वररुचिप्रणीतप्राकृतप्रकाशस्य 'नो ण सर्वत्र' इति सूत्रेण नकारस्य णकारो भवति इति कृत्वा गमण इत्यस्य संसिद्धिस्संजायते । एतेन कविवरोऽयं संस्कृतभाषायां प्राचीनैः पण्डितवर्य्यैरप्रयुक्तौ 'नवलगमण' शब्दौ लघुकाये काव्येऽस्मिन् प्रयुज्य 'निरङ्कुशाः कवयः' इति प्रत्नस्याभाणकस्य मूर्तश्चरितार्थयिता इव प्रतीयते । अधिकं किं ब्रूमः । लघुकाये कमनीये अदसीये काव्ये महाकविजयदेवस्य प्रबन्ध इव शब्दप्रयोगपटिमा गीतेषु श्लोकेषु च मधुरिमा दरीदृश्यते । तत् सर्वं सहृदया विज्ञाः काव्यमर्मज्ञाः पाठकाः सूक्ष्मेक्षिकया काव्यमिदं प्रपठ्य अनुभवन्तुतराम् ।

कार्तिकीपूर्णिमा सन् १९८१ प्रभातशास्त्री

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीसोमनाथकविकृतम्

॥ कृष्णगीतम् ॥

●

वन्दे नन्दकिशोरस्य चरणाम्बुजमद्भुतम् ।
यद्गोपिकाकराम्भोजभासुरश्रीविवर्धनम् ॥ १

उदेतु हृदयाकाशे नन्दनन्दनचन्द्रमाः ।
विकाशयतु मच्चित्तवृत्तिकैरविणीकुलम् ॥ २

गोपस्त्रीवशकारिणी शशधरज्योत्स्नातिरस्कारिणी,
सर्वामङ्गलहारिणी स्मररसप्रख्यातिसञ्चारिणी ।
राधाजीवितधारिणी व्रजकुलस्यानन्दविस्तारिणी,
हासश्रीर्व्रजसुन्दरस्य विशदा भूयान्मम श्रेयसे ॥ ३

श्रीराधिकानवलकेलिवशीकृतस्य,
कृष्णस्य गीतमिदमद्भुतभावपूर्णम् ।
कृष्णाङ्घ्रिपद्ममकरन्दलिहां नराणा-
मानन्दनाय कुरुते द्विजसोमनाथः ॥ ४

जयदेवकृताविवाग्र मे न गुणा यद्यपि नैव चातुरी ।
तदपि व्रजनाथकीर्तने विदुषो न प्रतिभाति मूकता ॥ ५

●

कानडरागेण गीयते

जय जय राधिकारमणीय ! ।
कुञ्जनाथ! क्लेश! केशव! कामिनीकमनीय! ॥ १ ध्रुवपदम्

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

माधव! व्रजनाथ! वल्लववल्लभासुरतेश!।
भङ्गुरभ्रुकुटीतटप्रकटीकृतस्मरवेश! ॥ २
मीनकुण्डलमण्डिताननखण्डिताधर! धीर!।
नीलरत्ननवीननीरदराजमानशरीर! ॥ ३
वल्लवीमुखचन्द्रचुम्बनलुब्धदृष्टिचकोर!।
मानिनीरतिकन्द! मानद! वन्द्य! नन्दकिशोर! ॥ ४
गोकुलेश! गुणज्ञ! गोधनचारणप्रिय! देव!।
गोपिकागणगीतगौरव! नागरीकृतसेव! ॥ ५
रासनर्तितनायिकारत! सङ्गरङ्गनिधान!।
शालपल्लवपाणिपल्लवगीतनृत्यनिदान! ॥ ६
वेणुनादविमोहितव्रजकुञ्जसद्मनिवास!।
पङ्कजायतमत्तलोचन! कुन्दसुन्दरहास! ॥ ७
सोमनाथसुखाय संप्रति कृष्णगीतमिदम्।
गीयतामनिशं जनाः! भवपापतापभिदम् ॥ ८

इति प्रथमाष्टपदी

●

वनावलिविलासिनं सरसराधिकालासिनं,
निकुञ्जगृहवासिनं व्रजकुलाम्बुजोद्भासिनम्।
शशाङ्कसितहासिनं तरुणयोपिदुल्लासिनं,
पुमांसमनुदासिनं स्मरत मेघसंकाशिनम् ॥ १
सुस्निग्धान्यववूभुजान्तरगतं पीताधरं सादरं,
भ्रूचापच्युतवक्रवीक्षणशरव्याधूतधैर्यं प्रियम्।
सा स्वप्ने सुदती विलोक्य रुदती तेन प्रियप्रेयसी,
कान्तेन प्रतिबोधिताऽपि विदधे मानं मनोहारिणी ॥ २

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रणयविनयवाक्यान्याह गोविन्ददूती,
मदनदहनमुग्धस्वान्तकान्तं निरीक्ष्य ।
कृततरणितनूजातीरवानीरवासां,
विरहहतविलासां राधिकां बोधयन्ती ॥ ३

मानं मा कुरु माधवे सखि! तवात्यन्तानुकूले प्रिये,
दोषं स्वप्नदशानुभूतमदधस्त्वं वल्लभे! तन्मृषा ।
कृष्णस्ते नवकुञ्जकेलिभवने तिष्ठत्यनङ्गाकुल-
स्तत् संभावय भावगर्भितगिरा गौराङ्गि! किं कुप्यसि ॥ ४

●

गूर्जरीरागेण गीयते

किं सहसे मदनानलदाहम् ।
तव चरणौ प्रणमामि सदाऽहम् ॥ १
राधे! माधवमनुसर धीरम् ।
किं कृशयसि विरहेण शरीरम् ॥ ध्रुवपदम्
नानाजनितसुरतरसरङ्गम् ।
मा परिहर वल्लवपतिसङ्गम् ॥ २
पश्यसि किं न सखीजनवदनम् ।
हरिणा सह परिभावय वदनम् ॥ ३
किं कुरुषे पुरुषे बहुमानम् ।
वाञ्छसि यदि माधवमुखपानम् ॥ ४
त्वमसि सकलतरुणीजनरत्नम् ।
स बहु करोति कृते तव यत्नम् ॥ ५
चलसि न किं मधुसूदनगेहम् ।
कलयसि किं विकलं निजदेहम् ॥ ६

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अनुनय विनयगिरा तमुदारम् ।
अपनय मदनदुरन्तविकारम् ॥ ७
सोमनाथवर्णितहरिचरितम् ।
येन विनश्यति कलिमलचरितम् ॥ ८

इति द्वितीयाष्टपदी

●

आस्यं हास्यवियोगि भोगिलतिकालावण्यहीनोऽधरो,
नो भाले तिलकोऽलकोऽप्यललितो लुप्ताञ्जने लोचने ।
वासस्ते मलिनं तनुस्तनुरियं वक्षोऽपि निर्भूषणं,
तन्मे मानिनि! शंस पश्यसि पुनर्मानेन कृते किं फलम् ॥ १
मुखे मानं ध्यानं हृदि रसनिधेरेव दधतीं,
सदानन्दां नन्दात्मजचरितचिन्तां प्रियतमाम् ।
स्वयं नैवायान्तीं तदतिगुरुमानक्षतिभयात्,
सखी राधां काचिन्मदनकृतबाधामिति जगौ ॥ २

●

केदाररागेण गीयते

शमय मनोभवजनितविकारम् ।
सुखमनुभव सुन्दरि! भवसारम् ॥ १
चल सखि! कुरु हरिणा सह सङ्गम् ।
जनयसि किं न मनसि बहुरङ्गम् ॥ ध्रुवपदम्
वृथा वहसि नवयौवनभारम् ।
कलयति यावदसौ न विहारम् ॥ २
हरिरपि तव कुरुते सखि! मानम् ।
रचय रुचिरनयने! शुभयानम् ॥ ३

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तव विरहानलदुःखितदेहम् ।
व्यथयति विधुरपि परिहृतगेहम् ॥ ४
सेवय विविधरसैरिह कृष्णम् ।
नवशृङ्गारसुधारसतृष्णम् ॥ ५
किमिति तनूकुरुषे तनुमेताम् ।
सुरतविहितरसभावसमेताम् ॥ ६
राजसि किमिति न रमणसमीपे ।
रमय वने बहुकुसुमितनीपे ॥ ७
जनयतु वल्लवयुवतीगीतम् ।
सोमनाथहृदि सुखमुपगीतम् ॥ ८

इति तृतीयाष्टपदी

●

शृङ्गारी तव कुञ्जकेलिरसिको रम्यं वयस्तेऽधुना,
धैर्यध्वंसि धनुर्दधाति नियतं मीनध्वजो देहिनाम् ।
माने मुञ्चसि नाग्रहं न च वचो धत्से मदीयं हृदि,
त्वं श्रेष्ठा तव वल्लभः स भविता क्लेशैकभाजो वयम् ॥ १
राधासखीं समादाय चलिता कृष्णदूतिका ।
तन्मुखेनैव तत्सख्या अवस्थां निजगाद सा ॥२
राधासखी माधवमम्बुजाक्ष-
मुवाच काचिन्मधुरं मृगाक्षी ।
मृगीदृशः कामकठोरबाण-
व्यथाकुलाया उपतापशान्त्यै ॥३

●

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गूर्जरीरागेण गीयते

वहु विलपति विरहे तव राधा ।
मदनवाणकृतबहुविधवाधा ॥१
केशव!किं चिरयसि चल कुञ्जम् ।
मुञ्चति कुसुमशरः शरपुञ्जम् ॥ ध्रुवपदम्
इच्छति तव मधुराधरपानम् ।
सा विदधाति मनसि बहुमानम् ॥२
ध्यायति तव मृदुवदनसरोजम् ।
शमयति मनसि न तेन मनोजम् ॥३
पश्यति तव हृदयागतरूपम् ।
युवतीजनमनसामनुरूपम् ॥४
मञ्जुलवञ्जुलविहितनिवासा ।
माधव ! विरहगतस्मितहासा ॥५
गच्छति घनवनयमुनातीरम् ।
रहसि विमुञ्चति लोचननीरम् ॥६
किं कथयामि तरुण ! बहुवादम् ।
गमयतु तरुणीचित्तविषादम् ॥७
सेवकसोमनायकृतगीतम् ।
जनयतु रसिकसुखं सदधीतम् ॥८

इति चतुर्थ्यष्टपदी

●

शीतांशुस्तपनत्यरण्यति गृहं हालाहलत्यम्बुजम्,
हारः सर्पति चन्दनं दहनति स्फीता कथा वज्रति ।
रात्रिः कल्पति चक्षुरभ्रति पिकक्वाणोऽपि बाणत्ययं,
कामः कालति कृष्ण! किं न कुरुषे कामं कुरङ्गीदृशः ॥१

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

व्रजकुलतिलकं विषादभाजं,
व्रजरमणीरमणीयकेलिगेहे ।
प्रियचतुरवचो विचित्रयुक्त्या,
पुनरपि किञ्चिदुवाच गोपराजम् ॥ २

तदवस्थां समाकृय्य पुनर्गीतेन माधवम् ।
बोधयन्ती सखी प्राह राधाबाधापनुत्तये ॥३

●

विराडीरामगिरीरागेण गीयते

अनिशं निशि कुरुते जागरणम् ।
त्वामतिहाय न किञ्चन शरणम् ॥१

राधा तव विरहाकुलचित्ता ।
माधव! मधुरिमपरिहृतचित्ता ॥ध्रुवपदम्

कथयति केशव! तव बहु नाम ।
त्यजति तवैव कृते निजधाम ॥२

कामबाणकृतविकलशरीरा ।
मुञ्चति लोचननीरमधीरा ॥३

त्वदधरमधुरपानकृतलोभा ।
चिरवियोगविगलिततनुशोभा ॥४

मदनजालमिव कलयति मालाम् ।
सुखय सदा करुणामय! बालाम् ॥५

ध्यायति तव मुखपङ्कजरागम् ।
हृदि विदधासि न कथमनुरागम् ॥६

अगणितवैभवभूषितगेहा ।
गुणवति भवति समर्पितदेहा ॥७

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इति कृतसोमनाथरसरचनम् ।
सुखयतु जनमबलाकुलवचनम् ॥८

इति पञ्चम्यष्टपदी

●

इत्याभीरशिरोमणिं प्रति सखी संप्रोच्य वाचं शुभा-
मायाता पुनरन्तिके मृगदृशो भास्वत्तनूजातटे ।
श्रीमन्नन्दकुमारकामकठिनावस्थां विलोक्य प्रियां,
प्रत्याह प्रियकोमलाक्षरवतीं वाणीं विदग्धोचिताम् ॥१

कामाकुलो जपति नाम तवैव राधे !
गन्तुं न पारयति ते कुटिलभ्रु! भीत्या ।
नो चन्दने न कमले न च शीतरश्मौ,
दृष्टिं ददाति दयितस्तव तन्वि! तापात् ॥२

त्वद्वेणीसदृशं बिभर्ति शिरसा प्रीत्यैव पिच्छं प्रिये!
तन्वि ! त्वद्वदनानुकारिकमलं धत्ते कथञ्चित् करे ।
कण्ठक्वाणसमस्वरा मुरलिका तेनाधरे स्थाप्यते,
मुग्धे ! त्वत्करकोमलं द्युतिधरं कर्णे कृतं पल्लवम् ॥३

स्वर्णे विद्युति कुङ्कुमे कुरबके पीतांशुके चम्पके,
किञ्जल्के कमलस्य नूतनरजनीखण्डे नखोल्लेखिते ।
सारूप्यं तव पीतवंशकुसुमे किञ्चिद् विलोक्याबले!
तिष्ठेत् सुन्दरि ! निर्भरस्मरमदोन्मादेन मत्तो हरिः ॥४

●

सामेरीरागेण गीयते

कलितललितस्वरश्रुतिवेणुमोहिता,
का न कामिनि! कुलं त्यजति नारी ।
मानयिष्यति मृदुलवचनस्वनो हरिः,
त्वामयं तन्वि! गिरिराजधारी ॥१

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कलय राधिके! मदनगोपालसङ्गम्।
सुरतरसकेलिकुतुकेन जनयिष्यति।
स्फुटमसौ सुतनु! ते मनसि रङ्गम्॥ ध्रुवपदम्

त्वमसि वरवर्णिनी सोऽपि वपुषः,
श्रिया शोभते समुचितमेतदुभयम्,
कम्पसे किमिति सखि! रसिकवरसङ्गमे,
जनय भामिनि! मनो मैव सभयम्॥२

नन्दनन्दमनिन्दितरुचिरचातुरी,
सुन्दरं रमय मन्मथविलासैः।
शमय सुन्दरि! कुसुमचापशरजव्यथां,
रचय सुन्दरकथा विशदहासैः॥३

घनतमसि कानने वसति कमलानने!
किमु विलम्बनमिदं तव विधेयम्।
अतिचपलचारुकुटिलभ्रुकुटिनर्त्तने,
तमिह सुभगे! करिष्यसि विधेयम्॥४

अङ्गसङ्गमसुखं तरुणि! करुणा-
मयस्तेऽभिलष्यति लतासदनवासी।
चल मलयसौरभे वहति पवने वने,
रमणि! यमुनातटे नवविलासी॥५

मण्डनं तव सहजलावण्यखण्डनं,
किमिति विदधासि भवरत्नरूपे!।
त्वरय कामाकुले! चतुरचूडामणौ,
सानुकम्पा भवाभीरभूपे॥६

त्वं भविष्यसि सकलयुवतिवरपूजिता,
दत्तचित्ता सती गोपिनाथे।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

लोकलोचनसुखददेहमोहितजने,
पावनेऽमरनिकरगीतगाथे ॥७
इयमुदितदूतिकाविनयवचनावली,
राधिकामनसि मोदं दधाना ।
सोमनाथे सदा भवतु सुखदायिनी,
कामकौतुकरसानां ददाना ॥८

इति षष्ठचष्टपदी

●

इति श्रुत्वा सख्याः प्रियमधुरवाक्यानि युवति-
विकारं कामोत्थ प्रशमयितुकामाऽलसगतिः ।
प्रसादं कर्तुं सा सुरतरसदानैर्जपते-
श्चचाल प्रोत्तुङ्गस्तनभरवती चारु निलयम् ॥१
क्वचिच्चलति सत्वरं क्वचन मन्थरं मानिनी,
क्वचित् तरुषु लीयते क्वचिदितः परावर्तते ।
क्वचिच्चकितमीक्षणं छिपति दिक्षु भीतेव सा,
करोति न कलक्वणं क्वचन कर्णयोः कोकिलम् ॥ २

●

केदाररागेण गीयते

राधा हरिभवनं प्रति वलिता ।
शशिवदना मदनालसगमना वचनारतिललिता ॥ ध्रुवपदम्
कुसुमकदम्वकलितकबरीभरविलसदनङ्गतरङ्गा ।
कामविजयपरमेव विराजितलोचनभृतरतरङ्गा ॥१
कुचतटनिकटलसिततरलावलिरलिकतिलककृतशोभा ।
कटिपटुरटितरुचिररसनागुणवर्द्धितनिधुवनलोभा ॥२

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पदकमलोपरिनादितनूपुरमधुरमधुव्रतमाला ।
मधुरिमसकलधुराधरणोचितविरचितभूषणजाला ॥३

रतिरसरसिकशिरोमणिना सह सा शय्यामधिशयिता ।
व्रजकुलतिलक विहितपरिरम्भणपरिभविताखिलदयिता ॥४

हठकृतमुखचुम्बनकरजक्षतकम्पितपाणिकिशलया ।
प्रमुदितपिकपारापतकूजितमिश्रितसस्वनवलया ॥५

सा कुरुते निजकञ्चुकमोचनचटुलरमणकररोधम् ।
पालयतीव पयोधरयुगलं शरणागतमिव योधम् ॥६

सापि निपीय सरसकृष्णाधरमादकमधुरसमत्ता ।
इति न च वेद काहमयमपि को रतये तनुरपि दत्ता ॥७

सोमनाथसेवकमुखनिःसृतराधाकृष्णविनोदम् ।
शृणुत तदिह विबुधा! यदि सुन्दरमिच्छथ निजहृदि मोदम् ॥८

इति सप्तम्यष्टपदी

●

घटयति भुजबन्धं निर्भरालिङ्गनार्थं,
तदधरमधु पीत्वा प्रेमभावं व्यनक्ति ।
जनयति रदखण्डं पण्डिता कामशास्त्रे,
वशयति पतिचेतश्चेतनीकृत्य कामम् ॥१

रमयति स्म मनोभवपीडिता,
व्रजपतिं वनिता मणिमण्डिता ।
विविधकामकलाकुशला रतिं,
जितवती निजदेहजसौष्ठवैः ॥२

●

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गूर्जरी काहलिरागेण वा गीयते

रमयति राधा नन्दकुमारम् ।
नवनिकुञ्जभवने मृदुपवने नानाविहितविहारम् ॥ ध्रुवपदम्
आलिङ्गति चुम्बति करजक्षतमर्पयति प्रियदेहे ।
बोधयतीव मदनमदमद्भुतकेलिकलागुणगेहे ॥१
सभ्रमचलितललितभ्रूकुटीगतिरतिनिपुणा रतिरङ्गे ।
व्रजभूषणवक्षसि वरतरुणी राजति गुणगणसङ्गे ॥२
श्रमशीकरशोभितमुखपङ्कजचपलालकमधुपाली ।
पिबति मधुरमधरं व्रजरमणी तदधरमपि वनमाली ॥३
विलसति नीलगिरेरुपरिस्था कनकलतैव सकम्पा ।
तन्वी निजलावण्यतिरस्कृतसजलजलदगतशम्पा ॥४
रतिसमयोचितविरचितमृदुतरवचनावलिरनुकूला ।
निधुवनरभसगलितकवरीभरकल्पितनीलदुकूला ॥५
लोचनयुगलममीलि विशालमलोपि विशेषकचित्रम् ।
परिरम्भणशिथिलितभुजवल्लीहृदयमकम्पि विचित्रम् ॥६
अतिमन्दीकृतजितकदलीरुचिरुचिरघनस्थललीला ।
मन्मथमथनप्रियसरसाकुलपुरुषायितरतशीला ॥७
इति नवरङ्गसङ्गसुखवर्णनमधिकविनोदरसालम् ।
सोमनाथहृदि जनयतु संप्रति शातमतीव विशालम् ॥८

इत्यष्टम्यष्टपदी

•

विचलदलकमालालोलताटङ्कशोभा,
निजरवजितनूत्यन्मत्तपारापता सा ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

घनजघनकुचान्तः कृष्णमापीड्य रेमे,
रणति जयमिवास्याः कान्तकाञ्चीकलापः ॥१
गलन्मुक्तामालं शिथिलनयन लुप्ततिलकं,
श्रमादम्भोविन्दुप्रसररससंकीर्णचिकुरम् ।
अतिक्षामालापं मधुरिमधुराधारिवदनं,
रतान्ते तद्रूपं तदतिरमणीयं मृगदृशः ॥२
विहरति वरवर्णिनी निकुञ्जे,
ललितलतातरुणप्रसूनपुञ्जे ।
नवलरसवशीकृतेन पत्या,
समुदितमारमनोरथेन रत्या ॥३

●

रामगिरीरागेण गीयते

विहरति ललितलताकृतभवने ।
व्रजदयिता दयिताननचुम्बनचारुतरा मृदुपवने ॥१ ध्रुवपदम्
रुचिरकुसुमकोमलदलपल्लवपरिकल्पितशुभशयने ।
स्थितवति रतिरमणीयतरे रमणे जितपङ्कजनयने ॥२
सुरतकलाकौतुककलिताकलिता कुरुते रतिरासम् ।
हरिरपि बन्धविशेषरसैरधिकं तनुते स विलासम् ॥३
क्वचिदुत्सङ्गनिवेशितया स तया विलसति रतिकारी ।
राशीकृतमरकतमणिमध्यसुवर्णलतारुचिहारी ॥४
कुटिलभ्रुकुटिकोदण्डविनिःसृतपञ्चशराशुगभीतम् ।
मृगमिव सा विवशीकुरुते रमणप्रकटितरतिगीतम् ॥५
तरलालककुलकलितमनोहरवदनविलज्जितचन्द्रा ।
अतिरसरभसपरा परिखेलति जनितविलोचनतन्द्रा ॥६

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

उपरि विलासवती भवती भवतीव कलाकुशला सा ।
जनयति कं न रसं पतिरेवं वदति परिस्फुटहासा ॥७

नवनवकुञ्जविलासभरेण वशीकृतनन्दकुमारम् ।
जनयतु वरतरुणीरतिरभितं सोमनाथसुखसारम् ॥८

इति नवम्यष्टपदी

●

भ्रुवौ कोदण्डः किं दृगियमतिलोला किमिषवः,
कुचद्वन्द्वं चैतत् किमिति करिकुम्भस्थलयुगम् ।
असौ निःश्वासः किं रसति रशना कामनृपतेः,
चमूर्नेयं राधेत्यतिचकितचित्तोऽवतु हरिः ॥१

प्रत्यङ्गवर्णनमिषेण विलासवत्याः,
संभाव्य कामनृपतेः पृतनां मुरारिः ।
इच्छन्नभीरुरपि भीरुरिव प्रसादं,
संभोगयोगरुचिरं निजगाद राधाम् ॥२

रामगिरी मेवाडरागेण वा गीयते

राधे! वशयसि मामधिकम् ।
त्वमसि विदग्धतरा वरसुरते जनयसि निरवधिकम् ॥१ ध्रुवपदम्

त्रिजगति रतिकौशलवति! रसिका युवती का मधुरा ।
त्वयि नवकुञ्जविहारिणि विलसति संप्रति कामधुरा ॥२

धनुरिव भृकुटियुगं तव भामिनि! वक्रिमसौभगसारम् ।
शितशरनिकर इव स्फुटशोभननयनमिदं चलतारम् ॥३

द्विरदकुम्भकमनीयतरं हृदि वहसि पयोधरभारम् ।
स्थितमवमत्य नृपस्मरसमरे भृणिसमनखप्रहारम् ॥४

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दुन्दुभिरिव रशना तनुते तव गुरुगम्भीरनिनादम् ।
को विदधाति वरोरु! भवत्या सह रणरङ्गविवादम् ॥५

उद्भटमल्लचमूरिव राजति भवती भावविमिश्रा ।
तव सङ्गमसुखहेतुरियं मम मुदमुद्वहति तमिस्रा ॥६

कलय वलयरञ्जितकरकमले मदुपरि भावविनोदम् ।
मामनुचरमिव मानिनि! मानय नय चेतो मम मोदम् ॥७

व्रजपतिरचितरुचिरवचनावलिजनितमनोजविलासा ।
सोमनाथसेवकसुखदा सा भवतु विशदरुचिहासा ॥८

इति दशम्यष्टपदी

●

मन्मथविलासकारी
सरसवचोभिर्विलासिनीवदनम् ।
वर्णयति भूरिभावै
र्व्रजरमणीरमणीयकामपूरः ॥१

●

श्रीरागेण आसाउरीरागेण वा गीयते

मदयति मम चेतस्तव वदनम् ।
शरदि विशदसरसिजमिव मानिनि! निरुपममधुरिमसदनम् ॥१ध्रुवपदम्

खञ्जनमदभञ्जनरतिरञ्जितलोचनरचितविलासम् ।
अलघुललितलावण्यविमिश्रितकोटिसुधासमहासम् ॥२

विमलदशनकिरणावलिदारितमन्मथतिमिरसमूहम् ।
जनयति कस्य न मनसि विहारिणि! शशधरविषयकमूहम् ॥३

सुभगविशालभालभुवि वर्तुलतिलककमुज्ज्वलशोभम् ।
शशिनि शशभ्रमदायिविशेषकलोकनवर्द्धितलोभम् ॥४

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

बिम्बाधरनिःसरदमृतद्रवविद्रावितरतिखेदम् ।
चुम्बनचारुनिषेधविधावधिकं भृकुटीभूतभेदम् ॥५
अगणितगुणगौरवगुम्फितमिदमद्भुतकेलिकलापम् ।
पारापतप्रतिवादकमादकमृदुतरमधुरालापम् ॥६
कुङ्कुमरसरञ्जितमञ्जुलमयपत्रविचित्रकपोलम् ।
सुरतविनोदकृते कुरुते मम हृदयमतीवविलोलम् ॥७
सोमनाथकविना रचिता रुचिरा वचनावलिरेषा ।
रसिकजनेषु मुदं तनुतामतिमञ्जुलभावविशेषा ॥८

इत्येकादश्यष्टपदी

●

अधरमधुसुधारसास्पदेन,
द्विजकिरणावलिदीर्घचन्द्रिकेण ।
मृगमदतिलकाङ्किना विना मे,
तव मुखचन्द्रमसा किमन्यदिष्टम् ॥१

इयमधिकमनोज्ञा कामिनी चन्द्रचूडा-
मणिरहमपि लीलाक्रीत एवाज्ञयाऽस्मि ।
इति निजवशगत्वं द्योतयन्नाह नारी-
नयननलिनपीतः पीतवासा मुकुन्दः ॥२

●

धन्याशीरागेण गीयते

राजते तरुणि ! तव तारुण्यलीला ।
विविधरसरङ्गरञ्जितसुरतकौतुके,
कोटिमन्मथमथनमाधुर्यशीला ॥१ ध्रुवपदम्

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कुसुमचयचित्रचुम्बितचिकुरचामरं,
चपलयति चेत एतन्मदीयम् ।
श्रवणपुटपुरटताटङ्करुचिरं चलं,
हन्ति मामपि त्वदीयम् ॥२

सुमुखि ! तव लोचनं कञ्जमदमोचनं,
चुम्बने कं न भावयति भावम् ।
इयमधरमाधुरी रहसि पीता सती,
नाशयति दुःसहं मदनदावम् ॥३

जितकण्ठकलकण्ठि! नेति नेति च वच-
स्तन्वि ! पोषयति पीयूषवर्षम् ।
स्निग्धकज्जलविन्दुरिन्दुमुखि! वर्धयति,
चारुचिबुके कृतो मनसि हर्षम् ॥४

सुभगभुजवल्लिकागाढपरिरम्भणं,
मामवति कामसङ्ग्रामकाले ।
उच्चकुचरोचिरञ्चितमुरो मामकं,
मारयति पुष्पधन्वा न बाले ! ॥५

नाभिगम्भीरसरसीतटे मेखला-
सारसी रटति सौरतविलासम् ।
दलितकलधौतकदलीजघनमण्डली,
मामसौ सुदति ! विदधाति दासम् ॥६

मञ्जुमञ्जीरधीरध्वनितबन्धुरं,
चटुलचरणद्वयं जितमरालम् ।
वसति मम मानसे सुखदनखचन्द्रिका,
खण्डते तन्वि ! तिमिरं करालम् ॥७

इति कुञ्जकेलिकमनीयमुखनिःसृतं,
वल्लवीदेहवर्णनविशेषम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सोमनाथे सदा शुभदमिदमस्तु तद्-
वचनरचनं कथितरूपरेखम् ॥८

इति द्वादश्यष्टपदी

●

ददस्व परिरम्भणं तरुणि ! पायय स्वाधरं,
विनोदय कुचौ रुचा कनककोककान्ती इमौ ।
प्रिये ! क्वणय किङ्किणीं जघनदर्शनं देहि मे,
हृदि स्वपदमर्पय प्रिय इति प्रियामुक्तवान् ॥१

●

आसाउरीरागेण गीयते

राधे ! विरचय मयि रतिरङ्गम् ।
सुतनु!सुतनुपरिरम्भणकर्मणि चटुलकुटिलभ्रूभङ्गम् ॥१ ध्रुवपदम्
पायय पिब मानिनि ! मधुराधरमधुमादकमतिमिष्टम् ।
मधुरिमकृतपीयूषपराभवमगणितमणितविशिष्टम् ॥२
मदुरसि सरसि विनोदय सुन्दरि!कुङ्कुमरुचिकुचकोकौ ।
परिमोचय कञ्चुकपञ्जरतः कुरु कुतुकेन विशोकौ ॥३
रुचिकरचपलविलोचनचुम्बनचारुतरापरशोभम् ।
किं कुरुषे पुरुखेलनकारिणि ! मानविवर्द्धितलोभम् ॥४
मुखरय मुषितमृगीगणदृष्टे ! पटुमेखलाकलापम् ।
दूरीकुरु करभोरु ! कृशोदरि ! मनसि मदनपरितापम् ॥५
कामकनकसिंहासनमिव मे दर्शय जघनमुदारम् ।
सफलय मम नयने वरवर्णिनि ! निधुवनवैभवसारम् ॥६
यावकरसरञ्जितमिदमर्पय मम हृदि चरणसरोजम् ।
प्रशमय विषमविलोचनलोचनपावकदग्धमनोजम् ॥७

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इति नवकुञ्जरसप्रियभाषितमद्भुतवचनविमिश्रम् ।
सोमनाथहृदि हरतु जगन्मथमन्मथमोहतमिस्रम् ॥८

इति त्रयोदश्यष्टपदी

●

यद्वाचो हिमशीतला हिमकराकारानुकारं मुखं,
यत्पाणी कमलश्रियौ विहसितालोकः सुधामन्दिरम् ।
यच्चेष्टा व्रजपालबालवनितामिष्टा सदेष्टः सता-
माविर्भूय मुदं ददातु हृदि मे सः श्रीयशोदासुतः ॥१

अतिकामितया तयानुरक्तः, कुरुते तद्गुणगौरवस्तवं सः ।
कथयन्नुपमानमानताङ्ग्या व्रजनाथो निजयोग्यतांश्च शंसन् ॥२

●

कनडुरागेण गीयते

दिशि दिशि सुभ्रु ! ते सुषमा ।
गीयते सखि ! दीयते नरकिन्नरैरुपमा ॥१ध्रुवपदम्

त्वं प्रिये ! चपलाहमस्मि घनो घनोरु ! वरः ।
त्वं लता ललिताहमस्मि तमालनीलतरः ॥ २

त्वं मनोजतरङ्गिणी जलधिस्तवाभिमतः ।
त्वं यदा नलिनी तदाहमलिर्मरन्दरतः ॥ ३

त्वं समा कलधौतकोमललेखयासि यदा ।
गण्यते निकषोपमा ममापि तन्वि ! तदा ॥ ४

त्वं यदा सरसीव भासि रते रसालतया ।
कल्पितोऽहमिहानुरागिणि ! तन्मरालतया ॥ ५

त्वं यदा मदविह्वला करिणीव कुञ्जरता ।
जायते मयि चारुहासिनि ! मत्तकुञ्जरता ॥ ६

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

त्वं यदा हरिणीव चञ्चललोचना सुरते ।
कृष्णसारसमानता मयि सम्मता नु रते! ॥ ७

राधिकागुणगौरवस्तुतये हरेरुदितम् ।
सोमनाथजने सदा कुरुतादिदं मुदितम् ॥ ८

इति चतुर्दश्यष्टपदी

●

त्वं विद्युज्जलदोऽहमस्मि भवती वल्ली तमालोऽस्म्यहं,
त्वं शृङ्गारतरङ्गिणी यदि तदा वारांनिधिः सोऽस्म्यहम् ।
त्वं चेत् पङ्कजिनी तदाहमलिराट् त्वं स्वर्णरेखा यदा,
सोऽहं स्यां निकषस्तदा समुचिता शोभा द्वयोरावयोः ॥ १

राधासखी वर्णयति स्वरूपं, वृन्दावनाधीशमनोऽनुरूपम् ।
प्रियस्वसख्यै परितुष्टचित्ता, परस्परालापविशिष्टचित्ता ॥ २

●

रामगिरीसारङ्गदेशाखैः रागेण गीयते
कामवामरसे ।
राजति राधा नवलवशे ॥ १ ध्रुवपदम्

कुञ्जतले नवपल्लवतल्पे ।
मुदितमधुव्रतकोकिलजल्पे ॥ २

रचितविशेषकचित्रविशेषा ।
कलितविलोचनकज्जलरेषा ॥ ३

चलकुण्डलमण्डितमुखचन्द्रा ।
नयनस्थितसुन्दररसतन्द्रा ॥ ४

विकचकुसुमगुम्फितकचभारा ।
उरसि मनोरममणिमयहारा ॥ ५

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कुङ्कुमरसरञ्जिततनुवल्ली ।
भाति कुचोपरि मञ्जुलमल्ली ॥ ६
मेचकमणिकल्पितकरवलया ।
निपुणतरा सुरते नवकलया ॥ ७
सोमनाथसेवककृतगानम् ।
रसिकजने कुरुतां सुखदानम् ॥ ८

इति पञ्चदशयष्टपदी

●

पुन्नागनागनवचम्पकजातियूथीमालत्यशोकमधुमत्तमधुव्रताढ्ये ।
वृन्दावने नवनिकुञ्जतले तरुण्या भेजे हरिर्मदनकेलिरसं वसन्ते ॥ १

●

वसन्तरागेण गीयते

रमते हरिरिह रुचिरनिकुञ्जे ।
कुसुमितकुञ्जकुटिरतरुमण्डलमण्डितमण्डपपुञ्जे ॥ १ ध्रुवपदम्
कुरबककरुणकदम्बकदलिकाशोकरसालसमेते ।
विदधति युवतिजनेषु मनोरममदनरसालसमेते ॥ २
विकचबकुलकलिकामञ्जुलमधुमत्तमधुव्रतमाले ।
कोकिलकुलकोलाहलकम्पितपल्लवतालतमाले ॥ ३
स्पृशति कुचौ मधुरं तदधरमधु पिबति निकुञ्जविहारी ।
सापि ललाटपटलपरिनर्तितभ्रूकुटिनटी नवनारी ॥ ४
व्रजपतिविहितविशददशनव्रणपीडनमक्षममाना ।
कुप्यति वदति जहीहि जहीहि करावपि कम्पयमाना ॥ ५
श्लथयति कटितटरुचिररशनागुणगुम्फितनीविनिबन्धम् ।
नहि नहि वचनममृतमिव रचयति जनयति निजभुजबन्धम् ॥ ६

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

हृतवति घनजघनावरणं रमणे प्रतिनिर्मितहासा ।
नर्तनमिव कुरुते सुरतेषु कटीविपटी सविलासा ॥ ७

सोमनाथसेवकमुखनिःसृतमुभयकिशोरचरित्रम् ।
कुटिलकामकलुषं जनमेतदिदं विदधातु पवित्रम् ॥ ८

इति षोडश्यष्टपदी

●

म्लिष्टाधरारुणिमशोणिमचारुचक्षुः,
सस्वेदबिन्दुवदनं शिथिलालकश्रि ।
क्षामाक्षरं पुलकवेपथुपूर्णगात्रं,
रूपं तथापि रुचये सखि ! पङ्कजाक्ष्याः ॥ १

●

देशाखभैरवरागेण वा गीयते

अद्भुतशोभा रजनिविरामे ।
सखि! संप्रति राधिकाशरीरे निजपतिपूरितकामे ॥१ ध्रुवपदम्

गलिताधरशोणिमशिथिलालकशोभितवदनसरोजे ।
मुकुलितलोचनचुम्बनलम्बितकज्जलमुदितमनोजे ॥ २

मृगमदलिखितविचित्रचित्ररुचिकुचतटनखप्रहारे ।
भुजपरिरम्भविमर्दविखण्डितमुक्तामणिमयहारे ॥ ३

श्रमजलविपुलपुलकपृथुवेपथुविस्मृतविरलाभरणे ।
कटिविघटितमृदुवररशनागुणपरिहृतजघनावरणे ॥ ४

अतिरुचिरुचिकरलम्भितनीवीदर्शनघर्षितरमणे ।
मन्थरचरणविहारविनिर्जितमदवारणवरगमणे ॥ ५

दुस्तरतरमन्मथसङ्गरजितवरवृन्दावननाथे ।
नवनिकुञ्जमधुकरगुञ्जारवनिगदितगुणगणगाथे ॥६

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चलकुण्डलमर्दितगण्डस्थलचित्रितमकरीमुद्रे ।
विविधनिखिलसौरतरसपोतकतोषितसुरतसमुद्रे ॥ ७
सोमनाथसेवकवर्णितमिति रतवल्लवीविनोदम् ।
शृणुत सकलकलिकालिमहारि भक्तमनःकृतमोदम् ॥ ८

इति सप्तदश्यष्टपदी

●

पुष्पाणि मे रचय केशव ! केशभारे,
हारेण रोचय कुचौ तिलकेन भालम् ।
नेत्रेऽञ्जनं कुरु कपोतलेऽपि चित्रं,
कृष्णं जगाद मृगशावविलोचनेति ॥ १

●

रामगिरीरागेण गीयते

वदति प्रिया सुरतेन तेन वशीकृते रमणे ।
केलिकौतुककौशलैरतनुव्यथाशमने ॥१ध्रुवपदम्
कुसुमानि मे कबरीभरे रचय प्रभो ! रुचिरम् ।
अलकं प्रसाधय माधव! स्वकरेण चारु चिरम् ॥ २
यादृशी तव गण्डमण्डलमण्डिता मकरी ।
क्रियते न किं मम तादृशी मदनप्रतापकरी ॥ ३
लोचने कुरु कज्जलं तिलकं ललाटतले ।
कुण्डले परिधापय प्रिय ! सुश्रवोयुगले ॥ ४
तारहारममुं कुरुष्व मदीयकण्ठतटे ।
नन्दनन्दन ! चन्दनं कुचयुग्मकामभटे ॥ ५
नीलरत्नमयं करे वलयं निधेहि हरे ! ।
वर्धय प्रिय ! वीटकैररुणप्रभामधरे ॥ ६

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अंशुकं न करोषि किं कलकिङ्किणीसहिते ।
प्राणनाथ ! कटीतटे सुरतत्रपारहिते ॥ ७

नूपुरौ नवनादवादनकारिणौ चरणे ।
जीवितेश ! विधेहि वल्लभ ! यावकाभरणे ॥ ८

सुन्दरीवचनामृतश्रवणेन तुष्टमनाः ।
सोमनाथहृदि स्थिरीभवतादसौ सुमनाः ॥ ९

इत्यष्टादश्यष्टपदी

●

तस्याः स्पर्शसुखाशया कृशतनोरङ्गेषु भूषाङ्गण-
न्यासं नन्दकुमार एव कुरुते कामाङ्कुरोद्भेदकृत् ।
मुक्तागुम्फितमेखलागुणयुतां बध्नाति नीवीं कटौ,
दत्ते चित्रमुरोजयोर्विरचयन् पत्रे कपोलस्थले ॥ १

कर्णौ कुण्डलिनौ करोति नयने सूक्ष्मं क्षिपत्यञ्जनं,
तद्भाले तिलकार्पणेन कथयत्यन्या न धन्याः स्त्रियः ।
तद्वेणी किल कामचामरमिति प्राचर्त्यसौ पुष्पकै-
रित्थं कामकलाकलापकुशलो राधावशे वर्तते ॥ २

●

धन्याशीरागेण गीयते

हृदि रङ्गरसम् ।
जनयति कामकलासरसम् ॥ १ ध्रुवपदम्

कुसुमचयैरञ्चति कुचभारम् ।
मनुते मन्मथचामरसारम् ॥ २

मुखमलिके तिलकेन सलोभम् ।
कुरुते चन्द्रमसा समशोभम् ॥ ३

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

क्रियते चक्षुषि कज्जलरेषा ।
तेन तिरस्कृतखञ्जनवेषा ॥ ४
कर्णपुटस्थितकुण्डललोला ।
अनुसूतवन्दीकृतरविलीला ॥ ५
लिखति कपोले मृगमदचित्रम् ।
निजरसमिव निःक्षिपति विचित्रम् ॥ ६
सोमनाथसेवकसुखकारी ।
भवतु सदा गिरिराजविहारी ॥ ७

इत्येकोनविंशतितमाष्टपदी

●

वशीकृतः संप्रति राधयासौ करोति तद् यद् वदति प्रिया सा ।
तदङ्गसङ्गामृतकाम्ययैव विभूषणन्यासमयं व्यधत्त ॥ १

कथयति सखि ! राधा प्राणनाथं प्रतीदं,
मम शिरसि शिखण्डं कुण्डले कर्णदेशे ।
रचय रुचिरगुञ्जापट्टकूलं कटौ मे,
त्वमिव भवितुमीहे वंशिकां देहि पाणौ ॥ २

●

रामगिरीरागेण मण्ठतालेन गीयते

राधा वदति रसाभिनिवेशा ।
त्रिभुवनयुवतीवरयुवतीसंविरचितमोहनवेशा ॥१ध्रुवपदम्
मुकुटीकुरु मम मदनमनोहरशिरसि शिखण्डिशिखण्डम् ।
मकराकृतिकुण्डलधरणेन महासभमण्डपगण्डम् ॥ २
गुञ्जामणिमाला मम कण्ठे सुन्दरवर ! परिधेया ।
सदयहृदय ! हृदये मम मानद ! मृगमदरुचिरपि देया ॥ ३
कनकरुचिरवसनेन शुभाशय ! शोभय कटितटदेशम् ।
मुररीघर ! मुररीमर्पय मम गापय मदननिदेशम् ॥ ४

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

त्वमिव भवामि भृतामितगौरवगिरिवर ! दधती रूपम् ।
हरिरपि गदति सुदति! रतमिच्छसि कामिनि! मयानुरूपम् ॥ ५
मामपि कुरु मानिनि ! निजभूषणभूषितमम्बुजनयने ! ।
शशिमुखि ! पञ्चशरं परिभावय पल्लवकोमलशयने ॥ ६
इति कथयति सति हसति शनैरिह विकसितमुखतामरसा ।
पतिविजयाय विजृम्भितरतिरणपौरुषरसरुचिसरसा ॥ ७
इति रसकेलिकथासु परस्परमुभयकिशोरकजल्पम् ।
सोमनाथकथितं कथयन्तु मुदा परिहाय विकल्पम् ॥ ८

इति विंशतितमाष्टपदी

●

क्षोभं क्षामकटिर्जगाम जघने जाते च किञ्चिज्जवे,
प्रस्विन्ना तनुवल्लरी शिथिलितो दोर्वल्लिबन्धोऽभवत् ।
पर्यस्तालकमण्डली मुकुलिते नेत्रे उरः कम्पितं,
पुंभावेन जुगोप गोपतरुणी स्त्रीत्वेऽपि धैर्यच्युतिम् ॥ १

सत्कामकेलिकृतकौतुकवेषधारी, हारी हरिन्मणिमनोहरदेहकान्तिः ।
श्रीराधिकावदनपङ्कजपानमत्तो, मत्तोपकः सपदि सुन्दरमूर्तिरस्तु ॥ २

नर्तितकुटिलभ्रुकुटीप्रकटीकृतकोकशास्त्रवैदग्ध्यः ।
कलयतु हृदि प्रवेशं कालिन्दीकेलिकौतुकः कृष्णः ॥ ३
न स्पर्द्धा जयदेवपण्डितकृतौ नो रञ्जनीया बुधा,
राजभ्यो धनलाभलोभकलया न व्याकुला मन्मतिः ।
भक्ताः किं नु हरेर्गुणानुकथने रक्ता भवन्त्येव नो,
तन्मे स्वस्य मनोविनोदनकृते कृष्णस्य गीतङ्कृतम् ॥ ४

●

इति श्रीसकलकविचक्रचूडामणिना
श्रीसोमनाथमिश्रेण विरचितं
कृष्णगीतं समाप्तम् ।

●

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

परिशिष्ट

गीतानामनुक्रमः

गीतानि	पृष्ठसंख्याः	गीतानि	पृष्ठसंख्याः
अ		र	
अद्भुतशोभा	२२	रमते हरिरिह	२१
अनिशं निशि	१७	रमयति राधा	१२
क		राजते तरुणि तव	१६
कलितललितस्वर	८	राधा वदति	२५
कामवामरसे	२०	राधा हरिभवनं	१०
किं सहसे मदनानल	३	राधे वशयसि	१४
ज		राधे विरचय	१८
जय जय राधिका	१	व	
द		वदति प्रिया सुरतेन	२३
दिशि दिशि सुभ्रु	१६	विहरति ललितलता	१३
ब		श	
बहु विलपति	६	शमय मनोभव	४
म		ह	
मदयति मम चेतः	१५	हृदि रसरङ्गम्	२४

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

समागतवृत्तलक्षणानि पृष्ठसंख्याश्च

अनुष्टुप्— श्लोके षष्ठं गुरु ज्ञेयं सर्वत्र लघु पञ्चमम् ।
द्विचतुष्पादयोर्ह्रस्वं सप्तमं दीर्घमन्ययोः ॥
१, ७

आर्या— यस्याः पादे प्रथमे द्वादशमात्रास्तथा तृतीयेऽपि ।
अष्टादश द्वितीये चतुर्थके पञ्चदश सार्या ॥
१५, २६

उपजातिः— अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः ।
५, २०, २५, २६

द्रुतविलम्बितम्—द्रुतविलम्बितमाह नभौ भरौ ।
११

पुष्पिताग्रा—अयुजि नयुगरेफतो यकारो ।
युजि च नजौ जरगाश्च पुष्पिताग्रा ॥
७, १३, १६

पृथ्वी— जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः ।
२, १०, १८

मालिनी— ननमयययुतेयं मालिनी भोगिलोकैः ।
२, ११, १२, १६, २५

वसन्ततिलका—उक्ता वसन्ततिलका तभजा जगौ गः ।
१, ८, १४, २१, २२, २३

वियोगिनी—विषमे ससजा गुरुः समे, सभरालोऽथ गुरुर्वियोगिनी ।
१, १६

शार्दूलविक्रीडितम्—सूर्याश्वैर्यदि मः सजौ सततगाः शार्दूलविक्रीडितम्
१; २, ३, ४, ५, ६, ८, १६, २०, २४, २६

शिखरिणी—रसैः रुद्रैश्छिन्ना यमनसभला गः शिखरिणी
४, १०, १३, १४

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पद्यानामनुक्रमणिका

पद्यानि	पृष्ठसंख्याः
अ	
अतिकामतया तया	१६
अधरमधुसुधा	१६
आस्यं हास्यवियोगि	४
इ	
इति श्रुत्वा सख्याः	१०
इत्याभीरशिरोमणिं	८
इयमधिकमनोज्ञा	१६
उ	
उदेतु हृदयाकाशे	१
क	
कथयति सखि राधा	२५
कर्णौ कुण्डलिनौ	२४
कामाकुलो जपति	८
क्वचिच्चलति	१०
क्षोभं क्षामकटिर्जगाम	२६
ग	
गलन्मुक्तामालं	१३
गोपस्त्रीवशकारिणी	१
घ	
घटयति भुजबन्धं	११
ज	
जयदेव कृताविवात्र	१
त	
तदवस्थां समाख्याय	७
तस्याः स्पर्शसुखाशया	२४
त्वं विद्युज्जलदो	२०
त्वद्वेणीसदृशं	८
द	
ददस्व परिरम्भणं	१८
न	
नर्तितकुटिलभ्रु कुटी	२६
न स्पर्द्धा जयदेवपण्डित	२६
प	
पुन्नागनागनवचम्पक	२१
पुष्पाणि मे रचय	२३
प्रणयविनयवाक्यान्याह	३
प्रत्यङ्गवर्णनमिषेण	१४
भ	
भ्रुवौ कोदण्डः किं	१४
म	
मन्मथविलासकारी	१५

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पद्यानि	पृष्ठसंख्याः
म	
मानं मा कुरु माधवे	३
मुखे मानं ध्यानं	४
म्लिष्टाधरारुणिम	२२
य	
यद्वाचो हिमशीतला	१६
र	
रमयति स्म मनोभवपीडिता	११
राधासखी माधवमम्बुजाक्ष	५
राधासखी वर्णयति	२०
राधासखीं समादाय चलिता	५
व	
वनावलिविलासिनं	२
वन्दे नन्दकिशोरस्य	१
व	
वशीकृतः संप्रति	२५
विचलदलकमाला	१२
विहरति वरवर्णिनी	१३
व्रजकुलतिलकं	७
श	
शीतांशुस्तपनत्यरण्यति	६
शृङ्गारी तव कुञ्जकेलि	५
श्रीराधिकानवलकेलि	१
स	
सत्कामकेलिकृत	२६
सुस्निग्धान्यवधू	२
स्वर्णे विद्युति कुङ्कुमे	८

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चन्द्रकलानाटिका (कविराज-आचार्यविश्वनाथप्रणीता) संस्कृतव्याख्या-हिन्दीटीकाभूमिकाभिः संवलिता। सं० श्रीतारिणीशझाः,। मूल्यम् ६.५०

छत्रपतिसाम्राज्यम् (नाटकम्) स्वर्गीयश्रीमूलशङ्करयाज्ञिक-प्रणीतमिदं नाटकं संस्कृतहिन्दीटीकोपेतं प्रकाशितम्। मूल्यम् ७.००

हास्यचूड़ामणिः (प्रहसनम्)—चन्देलनृपतिपरमर्दिदेवाभात्येन वत्सराजेन रचितमिदं प्रहसनम्। मूल्यम्—३.५०

गीतगिरीशम् (रागकाव्यम्)—गीतगोविन्दपरम्परायां श्रीरामभट्ट-लिखितस्येदम् प्रथमप्रकाशनम्। विस्तृतभूमिकापादटिप्पण्यादिभिः सनाथीकृतमिदं काव्यं पाठकानां कृते सर्वथा समुपयोगि। सं० श्रीप्रभातशास्त्री। मूल्यम् ६.००

रामगीतगोविन्दम् (रागकाव्यम्) मैथिलश्रीजयदेवकविप्रणीतमिदं काव्यं पाठकानां मनसि रामचरणेषु रतिं द्रढयति। सं०श्रीप्रभातशास्त्री। मू०—१०.००

गीतपीतवसनम् (रागकाव्यम्) शृङ्गाररसाप्लुतस्यास्य काव्यस्य प्रणेता श्रीश्यामरामकविमहोदयः। सम्पादकः श्रीप्रभातशास्त्री। मूल्यम्-५.००

चिमनीचरितम् (प्रेमकाव्यम्) इदमैतिहासिकं काव्यं कविश्रीनीलकण्ठ-रचितम्। सम्पादकः श्रीप्रभातशास्त्री। मूल्यम्-८.००

प्रतापविजयम् (नाटकम्) स्व०श्रीमूलशङ्करयाज्ञिकप्रणीतस्य संस्कृतहिन्दी-व्याख्यासनाथस्यास्य नाटकस्येदं प्रथमसंस्करणम्। सं०श्रीप्रभातशास्त्री मू० १०.००

लिङ्गानुशासनम् (व्याकरणम्) श्रीहर्षवर्द्धनप्रणीतम्। पृथिवीश्वरकृत-संस्कृतव्याख्यासहितम्। सम्पादकः श्रीप्रभातशास्त्री। मूल्यम् ५.००

भगवदज्जुकम् (प्रहसनम्) श्रीबोधायनविरचितम्। सं०श्रीप्रभातशास्त्री। मूल्यम् ४.००

गीतगौरीपतिः (रागकाव्यम्) गीतगोविन्दपरम्परायां कविश्रीभानुदत्त-विरचितमिदं गौरीगिरीशयोर्भक्तिभरितं भूमिकाटीकासंवलितञ्च। सं० श्रीप्रभात-शास्त्री। मूल्यम् १०.००।

सनत्सुजातीय दर्शनम् हिन्दीव्याख्यायुतम्। मूल्यम् ४.५०

देवभाषाप्रकाशनम् दारागंज इलाहाबाद-६

Dr. Urmila Sharma Collection, Varanasi